# Shri Bhavanishankara Suprabhatam

# श्रीभवानीशङ्करसुप्रभातम्

## Document Information


Text title : bhavAnIshankarasuprabhAtam

File name : bhavAnIshankarasuprabhAtam.itx

Category : shiva, suprabhAta

Location : doc_shiva

Author : Vaidakas of Shri Chitrapur Math

Proofread by : Sunder Hattangadi

Source : Shri Chitrapura Stuti Manjari,3rd ed. 2008

Acknowledge-Permission: Shri Chitrapur Math - Publications Committee https://chitrapurmath.net/

Latest update : March 2, 2018

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


August 30, 2023

*sanskritdocuments.org*

# श्रीभवानीशङ्करसुप्रभातम्

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १॥
मातस्समस्तजगतां त्रिपुरासुरारेः
अर्धाङ्गहारिणि महोज्ज्वलदिव्यकान्ते ।
शौरीन्द्रकादि-दिविजैः परिसेविताङ्घ्रे
श्रीवामदेवदयिते तव सुप्रभातम् ॥ २॥
सन्ध्यामुपास्य परिपूज्य च कामधेनूः
ता दोहयन्ति विधिवद्धुतवह्निमुख्याः ।
प्राध्यापयन्ति मुनयः श्रुतिमन्त्रपाठान्
कैलासवासवनिते तव सुप्रभातम् ॥ ३॥
प्राच्यङ्गनामरुणकाम्बरधारयन्तीं
प्रेम्णा विहस्य ननु धावति सूर्यदेवः ।
गन्धानिलस्तु शिशिरश्च शनैः प्रवाति
श्रीशैलनाथललने तव सुप्रभातम् ॥ ४॥
उत्तिष्ठ देवि वरदे कनकाद्रिवासे
राजत्सहस्रदलपद्मविहारशीले ।
नीवारशूकतनुभास्वरपीतभासे
श्रीकण्ठमानिनि शिवे तव सुप्रभातम् ॥ ५॥
शिवाकान्त शम्भो शशाङ्कार्धमौले
महेशान शूलिन् जटाजूटधारिन् ।
नमस्ते विभो विश्वमूर्ते सुमूर्ते
भवानीपते ते शिवं सुप्रभातम् ॥ ६॥
रामेश्वराधिष्ठितभव्यलिङ्ग
संस्तूयमानामरसार्वभौम ।
चित्रापुरश्रीमठमुख्यदेव

शम्भो भवानीधव सुप्रभातम् ॥ ७॥
लिपिब्रह्मरूपिन् गुणातीतरूप
चिदाकाशरूपिन् भवातीतरूप ।
महालिङ्गरूपिन् क्षरातीतरूप
भवानीपते ते शिवं सुप्रभातम् ॥ ८॥
चिदानन्दमूर्ते सुरानन्दकर्त्रे
परानन्दमूर्ते शिवानन्ददात्रे ।
भवानन्दमूर्ते स्मरानन्दहर्त्रे
भवानीपते ते शिवं सुप्रभातम् ॥ ९॥
त्राहि त्राहि महेश शङ्कर विभो संसारदुःखार्णवात्
सुज्ञानाश्रय शङ्करादियतिभिः चित्रापुराधिष्ठितैः ।
श्रीमच्छङ्करदेशिकेन्द्रविमलैश्छात्रैः सदा पूजित
हे शम्भो तव सुप्रभातममलं श्रीमद्भवानीपते ॥ १०॥
पुरारे स्मरारे सदा तापहार
मुरारेर्व्यथारे महापापहार ।
सुरारेः परारे त्रिलोकोपकार
भवानीपते ते शिवं सुप्रभातम् ॥ ११॥
रमाकान्तकान्तं शिवाशोकशान्तम्
वृषारूढदेवं शिवालिङ्गिताङ्गम् ।
चिताभस्मलेपं जटागाङ्गतोयम्
भवानीपते ते शिवं सुप्रभातम् ॥ १२॥
महेशं सुरेशं गिरीशं गणेशं
अजं निर्विकल्पं निजं निर्विकारम् ।
तमीशं भजे पञ्चवक्त्रं त्रिनेत्रं
भवानीपते ते शिवं सुप्रभातम् ॥ १३॥
ठकारद्वयं सुस्वसायुज्यरूपम्
रविग्लौ महाभूतहोतृस्वरूपम् ।
भजेऽहं निराकारओङ्कारवेद्यम्
भवानीपते ते शिवं सुप्रभातम् ॥ १४॥
उत्तिष्ठोत्तिष्ठ देवेश उत्तिष्ठ वृषभध्वज ।
उत्तिष्ठ गिरिजाकान्त त्रैलोकीमङ्गलप्रद ॥ १५॥
उत्तिष्ठ शम्भो करुणार्द्रपाङ्ग

ऋग्भिर्यजुर्भिश्च सुसामगीतैः ।
त्वां स्तौति देवर्षिमहर्षिसङ्घः
त्वद्दर्शनेप्सुश्च सुरेशसङ्घः ॥ १६॥
त्वयि सुप्ते जगत्सुप्तं त्वयि जागर्ति जाग्रति ।
तस्मादुत्तिष्ठ लोकेश अस्माकं मङ्गलं कुरु ॥ १७॥
प्रातः स्मरामि भवदीयपदारविन्दम्
गौरीकराब्जमृदुसंहननावलीढम् ।
स्तुत्यावदानमपि तुम्बुरुनारदाद्यैः
सम्बोधयामि मम चेतसि सुप्रबोधे ॥ १८॥
कैलासे सुमनोहरे मणिमये सौधे महामण्डपे
पर्यङ्के शयनीयतल्पमृदुले वामाङ्गी वामांसके ।
त्वद्वारिस्थितनन्दिनन्दितपदे गौराद्रिगौरीपते
संविष्टं तव सुप्रभातममलं श्रीमद्भवानीपते ॥ १९॥
गोकर्णक्षेत्रमध्यस्थ परिज्ञानाश्रमैर्वरैः ।
संसेवितपदाब्जाय भवानीशाय मङ्गलम् ॥ २०॥
चित्रापुरमठाचार्य प्रथमैश्शङ्कराश्रमैः ।
भक्त्याराधितभव्याय भवानीशाय मङ्गलम् ॥ २१॥
ज्ञानवैराग्यसम्पन्न-परिज्ञानाश्रमैश्शुभैः ।
सम्पूजित-महेशाय भवानीशाय मङ्गलम् ॥ २२॥
शङ्कराचार्यसच्छिष्यसञ्जातैश्शङ्कराश्रमैः ।
संस्तुतामरपूज्याय भवानीशाय मङ्गलम् ॥ २३॥
तत्त्वज्ञानसुधासिन्धुविधुभिः केशवाश्रमैः ।
श्रद्धयार्चितलिङ्गाय भवानीशाय मङ्गलम् ॥ २४॥
अज्ञानतिमिरव्रातभास्करैर्वामनाश्रमैः ।
सन्नुताय गिरीशाय भवानीशाय मङ्गलम् ॥ २५॥
वेदवेदान्तनिष्णातकृष्णाश्रमगुरूत्तमैः ।
सन्नुताय त्रिणेत्राय भवानीशायमङ्गलम् ॥ २६॥
चित्रापुरनवोन्मेषपाण्डुरङ्गाश्रमैर्बुधैः ।
वन्दितामरवन्द्याय भवानीशाय मङ्गलम् ॥ २७॥
सारस्वतजनानन्दैरानन्दाश्रमयोगिभिः ।
दृष्टानन्दस्वरूपाय भवानीशाय मङ्गलम् ॥ २८॥
आश्रिताश्रयसन्दक्षैः परिज्ञानाश्रमैः परैः ।

परिज्ञाताय भर्गाय भवानीशाय मङ्गलम् ॥ २९॥
ज्ञानयोगतपोदीप्तैः सद्योजातशङ्कराश्रमैः ।
सम्पूजिताय साम्बाय भवानीशाय मङ्गलम् ॥ ३०॥
भस्मोद्धूलितदेहाय पञ्चवक्त्राय शम्भवे ।
गङ्गाधराय शर्वाय भवानीशाय मङ्गलम् ॥ ३१॥
देवदानव-गन्धर्व-सिद्धयक्षोरगादिभिः ।
वन्दिताङ्घ्रिसरोजाय भवानीशाय मङ्गलम् ॥ ३२॥
मङ्गलं ते महेशाय मङ्गलं मृगधारिणे ।
मङ्गलं महते तुभ्यं भवानीशाय मङ्गलम् ॥ ३३॥
यत्पादस्मरणं मुदा कलयतां बद्धादराणां हृदि
सर्वाघौघहरं कलेर्मलहरं प्रातः स्मरं रुग्घरम् ।
सर्वैश्वर्यकरं सदा सुखकरं सन्मार्गदीपं मृड
त्वत्पादस्मरणं भवेत् प्रतिभवं सन्मङ्गलं मङ्गलम् ॥ ३४॥

इति श्री भवानीशङ्करसुप्रभातं सम्पूर्णम् ।

Proofread by Sunder Hattangadi

*Shri Bhavanishankara Suprabhatam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*